श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीकृष्णाष्टोत्तरशतनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीकृष्णाष्टोत्तरशतनामस्तोत्रम् ॥

छायायां पारिजातस्य हेमसिंहासनोपरि।
आसीनमम्बुदश्याममायताक्षमलंकृतम् ॥

चन्द्राननं चतुर्बाहुं श्रीवत्साङ्कितवक्षसम्।
रुक्मिणीसत्यभामाभ्यां सहितं कृष्णमाश्रये ॥

श्रीकृष्णः कमलानाथो वासुदेवः सनातनः।
वसुदेवात्मजः पुण्यो लीलामानुषविग्रहः ॥ 1 ॥

श्रीवत्सकौस्तुभधरो यशोदावत्सलो हरिः।
चतुर्भुजात्तचक्रासिगदाशङ्खाद्युदायुधः ॥ 2 ॥

देवकीनन्दनः श्रीशो नन्दगोपप्रियात्मजः।
यमुनावेगसंहारी बलभद्रप्रियानुजः ॥ 3 ॥

पूतनाजीवितहरः शकटासुरभञ्जनः।
नन्दव्रजजनानन्दी सच्चिदानन्दविग्रहः ॥ 4 ॥

नवनीतविलिप्ताङ्गो नवनीतनटोऽनघः।
नवनीतनवाहारो मुचुकुन्दप्रसादकः ॥ 5 ॥

षोडशस्त्रीसहस्त्रेशस्त्रिभङ्गी मधुराकृतिः।
शुकवागमृताब्धीन्दुर्गोविन्दो योगिनां पतिः ॥ 6 ॥

वत्सवाटचरोऽनन्तो धेनुकासुरभञ्जनः।
तृणीकृततृणावर्तो यमळार्जुनभञ्जनः ॥ 7 ॥

उत्तालतालभेत्ता च तमालश्यामलाकृतिः।
गोपगोपीश्वरो योगी कोटिसूर्यसमप्रभः॥ **8** ॥

इळापतिः परंज्योतिर्यादवेन्द्रो यदूद्वहः।
वनमाली पीतवासाः पारिजातापहारकः॥ **9** ॥

गोवर्धनाचलोद्धर्ता गोपालः सर्वपालकः।
अजो निरञ्जनः कामजनकः कञ्जलोचनः॥ **10** ॥

मधुहा मथुरानाथो द्वारकानायको बली।
वृन्दावनान्तः सञ्चारी तुलसीदामभूषणः॥ **11** ॥

स्यमन्तकमणेर्हर्ता नरनारायणात्मकः।
कुब्जाकृष्णांबरधरो मायी परमपूरुषः॥ **12** ॥

मुष्टिकासुरचाणूरमल्लयुद्धविशारदः।
संसारवैरी कंसारिर्मुरारिर्नरकान्तकः॥ **13** ॥

अनादिब्रह्मचारी च कृष्णाव्यसनकर्षकः।
शिशुपालशिरश्छेत्ता दुर्योधनकुलान्तकः॥ **14** ॥

विदुराक्रूरवरदो विश्वरूपप्रदर्शकः।
सत्यवाक् सत्यसङ्कल्पः सत्यभामारतो जयी॥ **15** ॥

सुभद्रापूर्वजो विष्णुर्भीष्ममुक्तिप्रदायकः।
जगद्गुरुर्जगन्नाथो वेणुनादविशारदः॥ **16** ॥

वृषभासुरविध्वंसी बाणासुरकरान्तकः।
युधिष्ठिरप्रतिष्ठाता बर्हिबर्हावतंसकः॥ **17** ॥

पार्थसारथिरव्यक्तो गीतामृतमहोदधिः।
कालीयफणिमाणिक्यरञ्जितश्रीपदाम्बुजः॥ **18** ॥

दामोदरो यज्ञभोक्ता दानवेन्द्रविनाशकः।
नारायणः परं ब्रह्म पन्नगाशनवाहनः॥ **19** ॥

जलक्रीडासमासक्तगोपीवस्त्रापहारकः।
पुण्यश्लोकस्तीर्थपादो वेदवेद्यो दयानिधिः॥ **20** ॥

सर्वतीर्थात्मकः सर्वग्रहरूपी परात्परः।
एवं श्रीकृष्णदेवस्य नाम्नामष्टोत्तरं शतम्॥ **21** ॥

कृष्णनामामृतं नाम परमानन्ददायकम्।
अत्युपद्रवदोषघ्नं परमायुष्यवर्धनम्॥ **22** ॥

॥ इति श्रीकृष्णाष्टोत्तरशतनामस्तोत्रं समाप्तम्॥